शनिमृत्युंजयस्तोत्र

खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई

श्रीः।

मार्त्तण्डभैरवतन्त्रोक्तं

शनिमृत्युंजयस्तोत्रम् ।

नेपालीयाञ्जनाभाभिधानवैद्यराजद्वारा संशोधितम् ।

खेमराज श्रीकृष्णदास,

अध्यक्ष-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,

बम्बई

॥ ❀ ॥ श्रीशनैश्चराय नमः ॥ ❀ ॥



संस्करण : अप्रेल २०१३, संवत् २०७०

मूल्य : १० रुपये मात्र

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

॥ श्रीः ॥

अथ मार्तण्डभैरवतन्त्रोक्तं

महाकालशनिमृत्युञ्जयस्तोत्रम्

श्रीगणेशायनमः ॥ ॐ शनैश्चराय नमः॥नीलाद्रिशोभाञ्चितदिव्यमूर्तिः खड्गी त्रिदण्डी शरचापहस्तः।शंभुर्महाकालशनिःपुरारिर्जयत्यशेषासुरनाशकारी ॥ १ ॥ मेरुपृष्ठे समासीनं सामरस्ये स्थितं शिवम्॥प्रणम्य शिरसा गौरी पृच्छति स्म जगद्धितम् ॥ २ ॥ पार्वत्युवाच॥भगवन् देवदेवेश भक्तानुग्रहकारक ॥ अल्पमृत्युविनाशाय यत्त्वया पूर्वसूचितम् ॥ ३ ॥ तदेव त्वं महाबाहो लोकानां हितकारकम्॥तव मूर्तिप्रभेदस्य महाकालस्य सांप्रतम् ॥४॥ शनेर्मृत्युञ्जयस्तोत्रं ब्रूहि मे नेत्रजन्म

नः ॥ अकालमृत्युहरणमपमृत्युनिवारणम् ॥५॥ शनिमन्त्रप्रभेदा ये तैर्युक्तं यत्स्तवं शुभम्॥प्रतिनाम चतुर्थ्यन्तं नमोन्तं मनुना युतम् ॥ ६ ॥ श्रीश्वर उवाच ॥ नित्ये प्रियतमे गौरि सर्वलोकहिते रते॥ गुह्याद्गुह्यतमं दिव्यं सर्वलोकोपकारकम् ॥ ७ ॥ शनिमृत्युञ्जयस्तोत्रं प्रवक्ष्यामि तवाधुना॥सर्वमङ्गलमांगल्यं सर्वशत्रुविमर्दनम् ॥८॥ सर्वरोगप्रशमनं सर्वापद्विनिवारणम् ॥ शरीरारोग्यकरणमायुर्वृद्धिकरं नृणाम्॥९॥ यदि भक्तासि मे गौरि गोपनीयं प्रयत्नतः ॥ गोपितं सर्वतन्त्रेषु तच्छृणुष्व महेश्वरि॥ ॥ १० ॥ ॐ अस्य श्रीमहाकालशनिमृत्युञ्जयस्तोत्रमन्त्रस्य पिप्पलाद ऋषिरनुष्टुप्छन्दो महाकालशनिर्देवता शं बीजमायसी शक्तिः कालपुरुषायेति कीलकं ममाकालापमृत्युनिवारणार्थे पाठे विनियोगः ॥ ऋषिन्यासं करन्यासं देहन्यासं समाचरेत्। महोग्रं मूर्ध्नि विन्यस्य मुखे वैवस्वतं न्यसेत् ११॥

गले तु विन्यसेन्मन्दं बाह्वोर्महाग्रहं न्यसेत्॥हृदि न्यसेन्महाकालं गुह्ये कृशतनुं न्यसेत्॥१२॥ जान्वोस्तूडुचरं न्यस्य पादयोस्तु शनैश्चरम् ॥ एवं न्यासविधिं कृत्वा पश्चात्कालात्मनः शनेः ॥१३॥ न्यासं ध्यानं प्रवक्ष्यामि तनौ ध्यात्वा पठेन्नरः।कल्पादियुगभेदांश्च करांगन्यासरूपिणः ॥१४॥ कालात्मनो न्यसेद्गात्रे मृत्युञ्जय नमोस्तु ते । मन्वन्तराणि सर्वाणि महाकालस्वरूपिणः॥१५॥भावयेत्प्रति प्रत्यंगे महाकालाय ते नमः ॥ भावयेत्प्रभवाद्यब्दञ्शीर्षे कालजिते नमः ॥ १६ ॥ नमस्ते नित्यसेव्याय विन्यसेदयने भ्रुवोः॥सौरये च नमस्तेस्तु गण्डयोर्विन्यसेदृतून्॥ १७ ॥श्रावणं भावयेदक्ष्णोर्नमः कृष्णनिभाय च ॥ महोग्राय नमो भाद्रं तथा श्रवणयोर्न्यसेत्॥१८॥नमो वै दुर्निरीक्ष्याय चाश्विनं विन्यसेन्मुखे। नमो नीलमयूखाय ग्रीवायां कार्तिकं न्यसेत् ॥१९॥ मार्गशीर्षं न्यसे-

द्राह्वोर्महारौद्राय ते नमः।ऊर्ध्वलोकनिवासाय पौ-
षं तु हृदये न्यसेत्॥२०॥नमः कालप्रबोधाय माघं
वै चोदरे न्यसेत्॥मन्दगाय नमो मेढ्रे न्यसेद्वै फा-
ल्गुनं तथा ॥२१॥ ऊर्वोर्न्यसेच्चैत्रमासंनमःशिवोद्भ-
वाय च ॥ वैशाखं विन्यसेज्जान्वोर्नमः संवर्त्तकाय
च ॥ २२ ॥ जंघयोर्भावयेज्ज्येष्ठं भैरवाय नमस्त-
था ॥ आषाढं पादयोश्चैव शनये च नमस्तथा
॥२३॥कृष्णपक्षं च क्रूराय नम आपादमस्तके ॥
न्यसेदाशीर्षपादान्ते शुक्लपक्षं ग्रहाय च ॥ २४ ॥
न्यसेन्मूलं पादयोश्च ग्रहाय शनये नमः ॥ नमः
सर्वजिते चैव तोयं सर्वांगुलौ न्यसेत् ॥ २५ ॥
न्यसेद्गुल्फद्वये विश्वं नमः शुष्कतराय च॥विष्णुभं
भावयेज्जंघोभये शिष्टतमाय ते ॥ २६ ॥ जानुद्वये
धनिष्ठां च न्यसेत्कृष्णरुचे नमः॥ऊरुद्वये वारुणर्क्षं
न्यसेत्कालभृते नमः ॥ २७ ॥ पूर्वभाद्रं न्यसेन्मेढ्रे
जटाजूटधराय च ॥ पृष्ठ उत्तरभाद्रं च करालाय

नमस्तथा ॥२८॥ रेवतीं च न्यसेन्नाभौ नमो मन्द-
चराय च ॥ गर्भदेशे न्यसेद्दस्त्रं नमः श्यामनराय
च ॥२९॥ नमो भोगिस्रजे नित्यं यमं स्तनयुगे
न्यसेत् ॥ न्यसेत्कृत्तिकां हृदये नमस्तैलप्रियाय
च ॥३०॥ रोहिणीं भावयेद्धस्ते नमस्ते खड्गधा-
रिणे ॥ मृगं न्यसेद्वामहस्ते त्रिदण्डोल्लसिताय च॥
॥३१॥ दक्षोर्द्ध्वं भावयेद्रौद्रं नमो वै बाणधारिणे ॥
पुनर्वसुमूर्ध्ववामे नमो वै चापधारिणे ॥३२॥तिष्यं
न्यसेद्दक्षबाहौ नमस्ते हरमन्यवे॥सार्पं न्यसेद्वाम-
बाहौ चोग्रचापाय ते नमः ॥३३॥ मघां विभाव-
येत्कण्ठे नमस्ते भस्मधारिणे॥मुखे न्यसेद्भगर्क्षं च
नमः क्रूरग्रहाय च ॥३४॥ भावयेद्दक्षनासायाम-
र्यमाणं च योगिने ॥ भावयेद्वामनासायां हस्तर्क्षं
धारिणे नमः॥३५॥ त्वाष्ट्रं न्यसेद्दक्षकर्णे कृसरान्न
प्रियाय ते॥स्वातीं न्यसेद्वामकर्णे नमो ब्रह्ममयाय
ते॥३६॥ विशाखां च दक्षनेत्रे नमस्ते ज्ञानदृष्टये।

त्रिष्कंभं भावयेच्छीर्षसन्धौ कालाय ते नमः३७॥
प्रीतियोगं भ्रुवोः सन्धौ महामंद नमोस्तु ते॥नेत्र-
योः सन्धावायुष्मद्योगं भीष्माय ते नमः ॥३८॥
सौभाग्यं भावयेन्नासासंधौ फलाशनाय च॥शोभ-
नं भावयेत्कर्णे सन्धौ पुण्यात्मने नमः ॥ ३९ ॥
नमःकृष्णायातिगण्डं हनुसन्धौ विभावयेत्॥नमो
निर्मांसदेहाय सुकर्माणं शिरोधरे ॥ ४० ॥ धृतिं
न्यसेद्दक्षबाहौ पृष्ठे छायासुतायच ॥ तन्मूलसंधौ
शूलं च न्यसेदुग्राय ते नमः॥४१॥तत्कूर्परं न्यसेद्ग-
ण्डे नित्यानंदाय ते नमः ॥ वृद्धिं तन्मणिबंधे च
कालज्ञाय नमो न्यसेत्॥४२॥ध्रुवं तदंगुलीमूलस-
न्धौ कृष्णाय ते नमः।व्याघातं भावयेद्वामबाहुपृष्ठे
कृशायच ॥४३॥ हर्षणं तन्मूलसंधौ भूतसंतापिने
नमः ॥ तत्कूर्परे न्यसेद्वज्रं सानंदाय नमोस्तु ते ॥
॥ ४४ ॥ सिद्धिं तन्मणिबंधे च न्यसेत्कालाग्नये
नमः॥व्यतीपातं कराग्रेषु न्यसेत्कालकृते नमः४५

वरीयांसे दक्षपार्श्वसंधौ कालात्मने नमः ॥ परिघं भावयेद्वामपार्श्वसंधौ नमोस्तु ते ॥४६॥ न्यसेद्द-क्षोरुसंधौ च शिवं वै कालसाक्षिणे॥ तज्जानौ भा-वयेत्सिद्धिं महादेहाय ते नमः॥४७॥साध्यं न्यसे-च्च तद्गुल्फसंधौ घोराय ते नमः ॥ न्यसेत्तदंगुली-संधौ शुभं रौद्राय ते नमः ॥४८॥ न्यसेद्वामोरु-संधौ च शुक्लकालविदे नमः॥ब्रह्मयोगं च तज्जानौ न्यसेत्सद्योगिने नमः॥४९॥ऐन्द्रं तद्गुल्फसन्धौ च योगाधीशाय ते नमः ॥ न्यसेत्तदंगुलीसंधौ नमो भव्याय वैधृतिम् ॥५०॥ चर्मणि बवकरणं भाव-येद्यज्वने नमः ॥ बालवं भावयेद्रक्ते संहारक नमो-ऽस्तुते ॥ ५१ ॥ कौलवं भावयेदस्थि नमस्ते सर्व भक्षिणे ॥ तैतिलं भावयेन्मांसे आममांसप्रियाय ते ॥५२॥ गरंन्यसेद्वपायां च सर्वग्रासाय ते नमः ॥ न्यसेद्वणिजं मज्जायां सर्वान्तक नमोस्तुते ॥५३॥ वीर्ये विभावयेद्विष्टिं नमो मन्यूग्रतेजसे ॥ रुद्रमित्र-

पितृवसुवारीण्येतांश्च पंच च ॥ ५४ ॥ मुहूर्तांश्च दक्षपादनखेषु भावयेन्नमः॥खगेशाय च खस्थाय खेचराय खरूपिणे ॥५५॥ पुरुहूतशतमखे विश्व-वेधो विधूंस्तथा॥मुहूर्त्तांश्च वामपादनखेषु भावये-न्नमः ॥५६॥ सत्यव्रताय सत्याय नित्यसत्याय ते नमः ॥ सिद्धेश्वर नमस्तुभ्यं योगेश्वर नमोऽस्तुते ॥५७॥वह्निनक्तञ्चरांश्चैव वरुणार्यमयोनिकाम्॥मु-हूर्त्तांश्च दक्षहस्तनखेषु भावयेन्नमः ॥५८॥ लग्नो-दयाय दीर्घाय मार्गिणे दक्षदृष्टये॥वक्राय चाति-क्रूराय नमस्ते वामदृष्टये॥५९॥वामहस्तनखेष्व-न्त्यवर्णेशाय नमोऽस्तुते ॥ गिरिशाहिर्बुध्न्यपूषाज-पाद्स्रांश्च भावयेत् ॥६०॥ राशिभोक्त्रे राशिगाय राशिभ्रमणकारिणे॥राशिनाथाय राशीनांफलदात्रे नमोऽस्तुते ॥६१॥ यमाग्निचन्द्रादितिकविधातॄंश्च विभावयेत् ॥ ऊर्ध्वहस्तपक्षनखेष्वंत्यकालाय ते नमः ॥६२॥ तुलोच्चस्थाय सौम्याय नक्रकुम्भगृ-

हाय च ॥ समीरत्वष्टृजीवांश्च विष्णुतिग्मद्युतीन्न्य
सेत्॥६३॥ ऊर्ध्ववामहस्तनखेष्वन्यग्रहनिवारिणे।
तुष्टाय च वरिष्ठाय नमो राहुसखाय च ॥ ६४ ॥
रविवारं ललाटे च न्यसेद्भीमदृशे नमः ॥ सोमवारं
न्यसेदास्ये नमोमृतप्रियाय च ॥ ६५ ॥ भौमवारं
न्यसेत्स्वान्ते नमो ब्रह्मस्वरूपिणे ॥ मेढ्रे न्यसेत्सौ
म्यवारं नमो जीवस्वरूपिणे॥६६॥ वृषणे गुरुवारं
च नमो मन्त्रस्वरूपिणे ॥ भृगुवारं मलद्वारे नमः
प्रलयकारिणे ॥६७॥ पादयोः शनिवारं च निर्मा-
साय नमोस्तु ते ॥ न्यसेत्केशेषु घटिकां नमस्ते
सूक्ष्मरूपिणे ॥६८॥ कालरूपिन्नमस्तेऽस्तु सर्व-
पापप्रणाशक॥ त्रिपुरस्य वधार्थाय शंभुजाताय ते
नमः ॥ ६९ ॥ नमः कालशरीराय कालनुन्नाय ते
नमः॥ कालहेतो नमस्तुभ्यं कालनन्दाय वै नमः॥
॥७०॥अखण्डदण्डमानाय त्वनाद्यन्ताय वै नमः॥
कालदेवाय कालाय कालकालाय ते नमः ॥७१॥

निमेषादिमहाकल्पकालरूपं च भैरवम् ॥ मृत्युञ्ज-
यं महाकालं नमस्यामि शनैश्चरम् ॥७२॥ दातारं
सर्वभव्यानां भक्तानामभयङ्करम् ॥मृत्युञ्जयं महा-
कालं नमस्यामि शनैश्चरम् ॥७३॥ कर्त्तारं सर्व-
दुःखानां दुष्टानां भयवर्धनम्॥मृत्युञ्जयं महाकालं
नमस्यामि शनैश्चरम् ॥७४॥ हर्त्तारं ग्रहजातानां
फलानामघकारिणाम् ॥ मृत्युञ्जयं महाकालं नम-
स्यामि शनैश्चरम्॥७५॥ सर्वेषामेव भूतानां सुखदं
शान्तमव्ययम् ॥ मृत्युञ्जयं महाकालं नमस्यामि
शनैश्चरम् ॥७६॥ कारणं सुखदुःखानां भावाभाव
स्वरूपिणम् ॥ मृत्युञ्जयं महाकालं नमस्यामि श-
नैश्चरम् ॥७७॥ अकालमृत्युहरणमपमृत्युनिवार-
णम्॥मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥
॥७८॥ कालरूपेणससारंभक्षयन्तंमहाग्रहम्॥मृत्यु
ञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥७९॥दुर्नि-
वीक्ष्यं स्थूलरोमं भीषणं दीर्घलोचनम् ॥ मृत्युञ्जयं

महाकालं नमस्यामि शनैश्चरम् ॥८०॥ ग्रहाणां ग्रहभूतं च सर्वग्रहनिवारणम्॥मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम्॥८१॥ कालस्य वशगाःसर्वे न कालःकस्यचिद्वशः॥तस्मात्त्वां कालपुरुष प्रणतोऽस्मि शनैश्चरम्॥८२॥ कालादेव जगत्सर्वं काल एव विलीयते॥कालरूपः स्वयं शंभुः कालात्मा ग्रहदेवता ॥८३॥ चण्डीशो रुद्रडाकिन्याक्रान्तश्चंडीश उच्यते ॥ विद्युदाकलितो नद्यां समारूढो रसाधिपः ॥ ८४ ॥ चंडीशः शुकसंयुक्तो जिह्वया ललितः पुनः॥ क्षतजस्तामसी शोभी स्थिरात्मा विद्युता युतः ॥८५॥ नमन्तो मनुरित्येष शनितुष्टिकरःशिवे॥आद्यन्तोष्टोऽत्तरशतं मनुमेनं जपेन्नरः ॥ ८६ ॥ यः पठेच्छृणुयाद्वापि ध्यात्वा संपूज्य भक्तितः॥तस्य मृत्योर्भयं नैव शतवर्षावधि प्रिये॥ ॥८७॥ ज्वराः सर्वे विनश्यंति दद्रुविस्फोटकच्छुकाः ॥ दिवा सौरिं स्मरेद्रात्रौ महाकालं यजन्

पठेत्॥८८॥ जन्मर्क्षे च यदा सौरिर्जपेदेतत्सहस्र-
कम्॥वैधगे वामवेधे वा जपेदर्द्धसहस्रकम् ॥८९॥
द्वितीये द्वादशे मन्दे तनौ वा चाष्टमेपि वा॥तत्त-
द्राशौ भवेद्यावत्पठेत्तावद्दिनावधि ॥९०॥ चतुर्थे
दशमे वापि सप्तमे नवपञ्चमे ॥ गोचरे जन्मलग्नेशे
दशास्वन्तर्दशासु च ॥ ९१ ॥ गुरुलाघवज्ञानेन
पठेदावृत्तिसंख्यया ॥ शतमेकं त्रयं वाथ शतयुग्मं
कदाचन ॥ ९२॥ आपदस्तस्य नश्यंति पापानि
च जयो भवेत्॥महाकालालये पीठे ह्यथवा जल-
सन्निधौ॥९३॥पुण्यक्षेत्रेऽश्वत्थमूले तैलकुम्भाग्रतो
गृहे॥नियमेनैकभक्तेन ब्रह्मचर्येण मौनिना ॥९४॥
श्रोतव्यं पठितव्यं च साधकानां सुखावहम् ॥ परं
स्वस्त्ययनं पुण्यं स्तोत्रं मृत्युञ्जयाभिधम् ॥९५॥
कालक्रमेण कथितं न्यासक्रमसमन्वितम् ॥प्रातः-
काले शुचिर्भूत्वा पूजायां च निशामुखे ॥ ९६ ॥
पठतां नैव दुष्टेभ्यो व्याघ्रसर्पादितो भयम्॥नाग्नि-

तो न जलाद्वायोर्देशे देशान्तरेऽथवा॥९७॥नाका-
ले मरणं तेषां नापमृत्युभयं भवेत् ॥ आयुर्वर्षशतं
साग्रं भवन्ति चीरजीविनः ॥ ९८ ॥ नातः परतरं
स्तोत्रं शनितुष्टिकरं महत् ॥ शांतिकं शीघ्रफलदं
स्तोत्रमेतन्मयोदितम् ॥९९॥ तस्मात्सर्वप्रयत्नेन
यदीच्छेदात्मनो हितम् ॥ कथनीयं महादेवि नैवा-
भक्तस्य कस्यचित् ॥ १०० ॥

इति मार्तण्डभैरवतन्त्रे महाकालशनिमृत्यु-
ञ्जयस्तोत्रं संपूर्णम् ॥

Printers & Publishers :
Khemraj Shrikrishnadass,
Prop: Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg, 7th Khetwadi,
Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s. Khemraj Shrikrishnadass
Proprietors Shri Venkateshwar Press, Mumbai - 400 004,
at their Shri Venkateshwar Press, 66 Hadapsar Industrial
Estate, Pune 411 013.

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग.
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS